# Shri Subrahmanya Ashtakam

# શ્રીસુબ્રહ્મણ્યાષ્ટકમ્

## Document Information

Text title : Shri SubrahmanyAshtakam 2

File name : subrahmaNyAShTakam2.itx

Category : aShTaka, subrahmanya

Location : doc_subrahmanya

Proofread by : Sivakumar Thyagarajan Iyer

Description/comments : 8 in Stotrasamuchchaya 1, Edited by Pandit K. Parameshwara Aithal

Latest update : January 2, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 2, 2023

*sanskritdocuments.org*

# Shri Subrahmanya Ashtakam

## શ્રીસુબ્રહ્મણ્યાષ્ટકમ્

નન્દનં તુહિનશૈલજાપતેર્નન્દનીયચરિતં ષડાનનમ્ ।
સુન્દરાઙ્ગમખિલાર્તિભઞ્જનં ભાવયામ્યખિલરોગશાન્તયે ॥ ૧॥

શૂરપદ્મમુખદૈત્યમર્દનં ક્રૂરભોગિવિષનાશનં ગુહમ્ ।
વીરબાહુમુખવીરસેવિતં ભાવયામ્યખિલરોગશાન્તયે ॥ ૨॥

આશ્રિતાખિલજનાવનોદ્યતં સુશ્રિતાઘનનિવૃત્તિતત્પ્રિયમ્ ।
આશ્રિતસ્વજનહૃન્નિકેતનં ભાવયામ્યખિલરોગશાન્તયે ॥ ૩॥

ચારુષણ્મકુટમણ્ડિતાનનં દારુણાખિલજગદ્વિકૃન્તનમ્ ।
વારણાનનસુહૃત્સહોદરં ભાવયામ્યખિલરોગશાન્તયે ॥ ૪॥

ઇન્દ્રજાપતિમુમાતનૂદ્ભવં ચન્દ્રકોટિસદૃશદ્યુતિં શુભમ્ ।
ઇન્દ્ર પૂર્વસુરવૃન્દવન્દિતં ભાવયામ્યખિલરોગશાન્તયે ॥ ૫॥

અમ્બિકાવદનપદ્મભાસ્કરં બિમ્બપક્વફલસુન્દરાવરમ્ ।
તં બિલેશયરૂપધારિણં ભાવયામ્યખિલરોગશાન્તયે ॥ ૬॥

ભક્તપાલપરિપાલનોદ્યતં ત્યક્તદુષ્ટજનમિષ્ટસિદ્ધિદમ્ ।
યુક્તમાર્ગનિરતપ્રિયં સદા ભાવયામ્યખિલરોગશાન્તયે ॥ ૭॥

સત્યચિદ્ઘનમુદારવિક્રમં નિત્યમગ્ર્યમખિલેશ્વરં પ્રભુમ્ ।
ભૃત્યહૃત્તિમિરસન્ધભઞ્જનં ભાવયામ્યખિલરોગશાન્તયે ॥ ૮॥

નિત્યમેવ હૃદિ ષણ્મુખં સ્મરન્ યઃ પઠેદિદમનન્યમાનસઃ ।
રોગનાશનકરં સ માનુષઃ સર્વરોગરહિતઃ સુખી ભવેત્ ॥ ૯॥

ઇતિ શ્રીસુબ્રહ્મણ્યાષ્ટકં સમ્પૂર્ણમ્ ।

Proforead by Sivakumar Thyagarajan Iyer

*Shri Subrahmanya Ashtakam*

pdf was typeset on January 2, 2023

Please send corrections to *sanskrit@cheerful.com*